विबाधा, स्त्री, विहेठनम् । इति त्रिकाण्डशेषः ॥

विबुधः, पुं, (विशेषेण बुध्यते इति । बुध + कः ।) देवः । इत्यमरः ॥ ( यथा, मनौ । १२ । ४७ ।

"गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये ॥")

पण्डितः । इति मेदिनी । धे, २६ ॥ ( यथा, कथासरित्सागरे । ६३ । १०५ ।

"ब्रवीमि विबुधः खेदं जनानां निहुते कथम् ।"

असिन्नर्थे वाच्यलिङ्गोऽपि दृश्यते ॥ ) चन्द्रः । इति हलायुधः ॥

विबुधानः, पुं, (वि + बुध + शानच् ।) आचार्य्यः । पण्डितः । देवः । इति संक्षिप्तसारोणादि-वृत्तिः ॥

विबोधः, पुं, ( विगतो बोधः । ) अनवधानता । इति केचित् ॥ (विशिष्टो बोधः । ) प्रबोधश्च ॥ ( यथा, भागवते । ३ । ४ । २० ।

"स एवमाराधितपादतीर्थाद-
धीततत्त्वात्मविबोधमार्गः ॥"

बोधपत्निपुत्रः । यथा, मार्कण्डेये । १ । २१ ।

"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा ।
द्रोणपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः शास्त्र-
चिन्तकाः ॥")

विबोधनं, क्ली, ( वि + बुध + ल्युट् । ) प्रबोधनम् । यथा,—

"सुष्वाप योगनिद्रान्तामेकाग्रहृदयस्थितः ।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥"

इति देवीमाहात्म्यम् ॥

( जागरणम् । यथा, महाभारते ।१।९००।५

"वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः ॥"

प्राप्तिबोधके, त्रि । यथा, ऋग्वेदे । १८ । २२ ।

"अदाभ्यो विबोधनम् ।"

"रायो धनस्य विबोधनं विशेषेण बोधकं बहु-धनप्राप्तिहेतुमित्यर्थः ।" इति तद्भाष्ये सायनः ॥)

विभक्तः, त्रि, (वि + भज् + क्तः । ) प्राप्तविभागः । विभिन्नः । पृथक् । यथा । बृहस्पतिः ।

"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः ।
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते ।
अनीशः पूर्व्वजः पित्र्ये भ्रातृभागे विभक्तजः ॥"

विभक्तजो विभागानन्तरं गर्भाधानेन जातः ॥ अपि च । व्यासः ।

"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते ।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते ॥"

विभक्तानां स्वमाधने वैदिककर्म्मकरणात्तच्छा-द्धकर्म्मरतेन तद्वृद्धिरित्यर्थः ।

"विभक्ता अविभक्ता वा सपिण्डाः स्थावरे
समाः ।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये ॥"

अपि च ।

"दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः ।
विभक्तानां पृथक् ज्ञेयाः पाकधर्म्मागमव्ययाः ॥
साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥
येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वमृक्थतः ।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् ॥"

इति नारदवचनानि ॥

तथा ।

"भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तत् स्मृतम् ॥"

इति याज्ञवल्क्यवचनम् ॥ * ॥

तथा ।

"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र
संस्थितः ।
पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥",

इति बृहस्पतिवचने येषामेव हि पितृभ्रातृ-पितृव्यादीनां पितृपितामहोपार्ज्जितद्रव्येणा-विभक्तत्वसम्भवः तत एव विभक्ताः सन्तः परस्परप्रीत्या पूर्व्वकृतविभागध्वंसेन यत्तव धनं तन्मम धनं यन्मम धनं तत्तवापि इत्येक-स्मिन् कार्य्ये एकगृहित्वरूपतया स्थिताः संसृष्टाः । न त्वेवं रूपाणां धनसंसर्गमात्रेण । नापि विभ-क्तानां प्रीतिपूर्व्वकाभिसन्धानं विना ॥ * ॥ तथा ।

"बन्धूनामविभक्तानां भोगं नैव प्रदापयेत् ॥"

इति कात्यायनवचनम् ॥

तथा ।

"भ्रातॄणामविभक्तानामेको धर्म्मः प्रवर्त्तते ।
विभागे सति धर्म्मोऽपि भवेत्तेषां पृथक्पृथक् ॥"

तथा ।

"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह ।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन ॥"

इति मनुवचनम् ॥

तथा । कात्यायनः ।

"अविभक्ते मृते पुत्त्रे तत्सुतं रिक्थभागिनम् ।
कुर्व्वीत जीवनं येन लब्धं नैव पितामहात् ।
लभेतांशं स पित्र्यं च पितृव्यात् तस्य वा
सुतात् ॥"

तथा । विष्णुः । पितृविभक्ता विभागानन्तरो-त्पन्नस्य विभागं दद्युः ॥ * ॥ अपि च ।

"अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥"

इति कात्यायनवचनम् ॥

अविभक्तानां सह वसतां संसृष्टानां वा पुन-र्विभागो भ्रातृतत्सुततत्सुतपर्य्यन्तमेव तत्सुता-च्चतुर्थान्निवर्त्तते । इति ॥ तथा ।

"अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेत् ।
विभक्तं स्थावरं प्राप्तं नान्योन्यैः कदाचन ॥"

इति यमवचनम् । एतानि वचनादीनि दाय-तत्त्वधृतानि ॥ * ॥ अपि च ।

"अविभक्ता विभक्ता वा कुर्य्युः श्राद्धमदैविकम् ।
मघासु च ततोऽन्यत्र नाधिकारः पृथक् विना ॥"

इति श्राद्धतत्त्वम् ॥

अन्यच्च ।

"बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः ।
सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम् ।
द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत् ॥"

इति शुद्धितत्त्वम् ॥

(पुं, कार्त्तिकेयः । यथा, महाभारते ।३।२३१।६।

"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः ।
कन्याभर्त्ता विभक्तश्च स्वाहेयो रेवतीसुतः ॥")

विभक्तजः, पुं, ( विभक्ते सति जायते इति । जन + डः । ) विभागानन्तरं गर्भाधानेन जातः । यथा । बृहस्पतिः ।

"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः ।
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते ।
अनीशः पूर्व्वजः पित्र्ये भ्रातृभागे विभक्तजः ।
यथा धने तथर्णेऽपि सुक्ता शौचोदकक्रियाः ॥"

इति दायतत्त्वम् ॥

विभक्तिः, स्त्री, ( विभजनमिति । संख्याकर्म्मादयो ह्यर्था विभज्यन्ते आभिरिति वा । वि + भज + क्तिन् । ) विभागः । स्यादिः त्यादिश्च । यथा ।

"संख्याकारकबोधयित्री विभक्तिः ॥"

तु वचनरूपा संख्याश्चर्य्यः । ( संख्यावाचकशक्तिमान् प्रत्ययः ।

"सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ् चेति प्रभे-
दतः ॥"

संख्यावच्छिन्नावच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः । सुप् तिङ् इति भेदा-द्विविधा । इति शब्दशक्तिप्रकाशिका ॥ ( उभ-यार्थोदाहरणम् । यथा, नैषधे । ३ । २३ ।

"क्रियेत चेत् साधु विभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया ।
या स्वौजसां साधयितुं विलासै-
स्तावत् क्षमा नाम पदं बहु स्यात् ॥")

विभजनीयं, त्रि, विभाज्यम् । विभागयोग्यम् । यथा । यद्दृव्यस्य प्रयोजनार्हं पुस्तकादि तद्-व्यस्तादिभिः सह पण्डितादिभिर्न विभजनीयम् । इति दायतत्त्वम् ॥ भजनार्हम् । विपूर्व्वभज-धातोरनीयप्रत्ययेन निष्पन्नम् ॥

विभवः, पुं, धनम् । ( यथा, मनौ । ४ । ३४ ।

"न जीर्णमलवद्वासा भवेच्च विभवे सति ॥")

मोक्षः । ऐश्वर्य्यम् । इति मेदिनी । वे, ५१ ॥ ( यथा, भागवते । ७ । ८ । ५५ ।

"भवता हरे स हतोऽसुरादितो
नरसिंह नाथ विभवाय नो भव ॥")

प्रभवादिषष्टिसंवत्सरान्तर्गतद्वितीयवर्षम् । यथा, भविष्यपुराणे ।

भैरव उवाच ।

"सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः ।
प्रशान्ता मानवाश्च बहुशस्या वसुन्धरा ।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने ! ॥"

इति ज्योतिस्तत्त्वम् ॥

विभा, स्त्री, ( वि + भा + क्विप् । ) किरणः । इति हेमचन्द्रः ॥ प्रकाशः । शोभा । इति राज-निर्घण्टः ॥ ( यथा, साहित्यदर्पणे । १०।६६७ ।

"कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति बत यस्य तव ॥"

प्रकाशके, त्रि । यथा, ऋग्वेदे ।१०।५५।४।